Click here to go back



॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

# अथ आदित्य स्तोत्रं>

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

ओं अस्य श्री भगवानादित्यस्तोत्र महामंत्रस्य अगस्त्य ऋषिः। अनुष्टुप्छंदः। सूर्यनारायणो देवता। सूं बीजं। यं शक्तिः। मं कीलकं। आदित्यप्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) आदित्याय अंगुष्ठाभ्यां नमः। अर्काय तर्जनीभ्यां नमः। दिवाकराय मध्यमाभ्यां नमः। प्रभाकराय अनामिकाभ्यां नमः। सहस्रकिरणाय कनिष्टिकाभ्यां नमः। मार्तांडाय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) आदित्याय हृदयाय नमः। अर्काय शिरसे स्वाहा। दिवाकराय शिखायै वषट्। प्रभाकराय कवचाय हुं। सहस्रकिरणाय नेत्रत्रयाय वौषट्। मार्तांडाय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) ध्यायेत्सूर्यमनंतकोटि किरणं तेजोमयं भास्करं। भक्तानामभयप्रदं दिनकरं ज्योतिर्मयं शंकरं॥ आदित्यं जगदीशमच्युतमजं त्रैलोक्यचूडामणिं। भक्ताभीष्ट वरप्रदं दिनमणिं मार्तांडमाध्यं शुभं॥ कालात्म सर्वभूतात्म वेदात्मा विश्वतोमुखः। जन्ममृत्यु जराव्याधि संसार भयनाशनः। ब्रह्मस्वरूपमुदये मध्याह्नेतु महेश्वरः। अस्तमाने स्वयं विष्णुः त्रयिमूर्तिर्दिवाकरः॥ एकचक्ररथोयस्य दिव्यः कनकभूषितः। सोयं भवतु नः प्रीतः पद्महस्तो दिवाकरः॥ पद्महस्तः परंज्योतिः परेशाय नमोनमः। अंडयोनिर्महासाक्षी आदित्याय नमोनमः॥ कमलाशन देवेश आदित्याय नमोनमः॥ धर्ममूर्तिर्दयामूर्तिः सत्वमूर्तिर्नमोनमः। सकलेशाय सूर्याय क्षांतेशाय नमोनमः। क्षयापस्मार गुल्मादि दुर्दोषव्याधिनाशनं॥ सर्वज्वरहरंचैव कुक्षिरोगनिवारणं। एतत्स्तोत्रं शिवप्रोक्तं सर्वसिद्धिकरं परं। सर्वसंपत्करंचैव सर्वाभीष्ट प्रदायकं॥ इति आदित्य स्तोत्रं॥

---

Click here to go back